**PG/IVS/SAN-402/15**

# M.A. 4th Semester Examination, 2015

## SANSKRIT

PAPER— SAN-402 (Group-A & B)

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right-hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

## GROUP – A

( *Literature and Literary Criticism* )

[ *Marks* : 40 ]

1. भवभूतिना प्रणीतस्य 'उत्तररामचरितम्' इति नाटकस्य प्रथमाङ्के उपस्थापितस्य चित्रदर्शनस्य नाटकीयतात्पर्यमालोच्यताम् । 12

*अथवा*

'कारुण्यं भवभूतिरेव तनुते' — इति समीक्ष्यताम् ।

( *Turn Over* )

2. संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्यायताम् — 8

लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुवर्तते ।।

*अथवा*

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति हि पुनर्भूयान्भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः ।।

3. भग्नविग्रहविषये श्रीरामकृष्णेन को विधिः प्रदत्तः ? तन्मतानुसारेण मथुरानाथेन का व्यवस्था गृहीता ? 12

*अथवा*

जगज्जनन्याः दर्शनलाभार्थं गदाधरस्य व्याकुलता यथाग्रन्थमालोच्यताम् ।

4. संस्कृतभाषया देवनागरीलिपिमनुसृत्य च सप्रसङ्गं व्याख्यायताम् — 8

हिमाद्रेः स्थिरत्वं द्युनद्याश्चलत्वं
रवेस्तापमुग्रं विधोः शीतलत्वम् ।
पवेः पूर्णदार्ढ्यं सुमानां मृदुत्वं
चिरं बिभ्रतां नो जये का नु वाधा ?

*अथवा*

किं कर्दमाक्तं धरणीतलं क्वचिद्
व्योम्नो निरङ्कस्य भजेत् प्रतीकताम् ?
तुच्छातितुच्छं तृणपुष्पकं तथा
हा पारिजातस्य सुचारु-रोचिषः ?

## GROUP – B

( *Philosophy* )

[ *Marks* : 40 ]

1. अधोलिखितेषु कस्यचिदेकस्य प्रश्नोत्तरं देयम् — 13

(*क*) 'चित्तमयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वं भवति पुरुषस्य स्वामिनः' — इति भाष्यग्रन्थस्याशयः सम्यक् प्रतिपाद्यताम् ।

(*ख*) का नाम वृत्तिः ? सा कतिविधा ? सूत्रे 'पञ्चतय्यः' इति तयप्प्रत्ययस्य सार्थकयं विचार्यताम् । वृत्तीनां क्लिष्टत्वा-क्लिषृत्वभेदः परिष्क्रियताम् ।

(*ग*) 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' सूत्रमिदं भाष्यदिशा व्याख्यायताम् ।

2. कस्यचिदेकस्य सुरगिरा देवनागरीलिप्या च टीका लेख्या — 7 × 1

(*i*) अभावप्रत्ययालम्बाना वृत्तिर्निद्रा ।

(*ii*) ईश्वरप्रणिधानाद्वा ।

(*iii*) प्रत्यक्षानुमानागमाः प्रमाणानि ।

3. यथेच्छमेकस्य प्रश्नस्योत्तरं देयम् — 13

(*क*) वाक्यपदीयग्रन्थे विस्तारितं स्फोटरूपं शब्दब्रह्मतत्त्वं विशदीक्रियताम् ।

(*ख*) अर्थवादस्य स्वरूपं भर्तृहरिमताभिप्रायेण वेदस्य प्रयोजनावसरे दार्शनिकमतवाहानां तात्पर्यं निरुप्यताम् ।

(*ग*) शब्दार्थयोः सम्बन्धस्य नित्यतामधिकृत्य वाक्यपदीयानुसारं कश्चनाभिसन्दर्भः प्रस्तूयताम् ।

4. अधो लिखितयोः कारिकयोः एका सप्रसङ्गं सुरगिरा देवनागरलिप्या च व्याख्यायताम् — 7 × 1

(*i*) अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।
जन्मादयो विकाराः षड् भावभेदस्य योनयः ।।

(*ii*) आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
छन्दसां प्रथममङ्गमाहुर्व्याकरणं बुधाः ।।

---